श्रीमदाञ्जनेयाष्टोत्तरशतनामावली

{॥ श्रीमदाञ्जनेयाष्टोत्तरशतनामावली ॥}

ॐ मनोजवं मारुततुल्यवेगं

जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं

श्रीरामदूतं शिरसा नमामि ॥

ॐ आञ्जनेयाय नमः ।

ॐ महावीराय नमः ।

ॐ हनूमते नमः ।

ॐ मारुतात्मजाय नमः ।

ॐ तत्त्वज्ञानप्रदाय नमः ।

ॐ सीतादेवीमुद्राप्रदायकाय नमः ।

ॐ अशोकवनिकाच्छेत्रे नमः ।

ॐ सर्वमायाविभञ्जनाय नमः ।

ॐ सर्वबन्धविमोक्त्रे नमः ।

ॐ रक्षोविध्वंसकारकाय नमः । १०

ॐ परविद्यापरिहर्त्रे नमः ।

ॐ परशौर्यविनाशनाय नमः ।

ॐ परमन्त्रनिराकर्त्रे नमः ।

ॐ परयंत्रप्रभेदकाय नमः ।

ॐ सर्वग्रहविनाशकाय नमः ।

ॐ भीमसेनसहाय्यकृते नमः ।

ॐ सर्वदुःखहराय नमः ।

ॐ सर्वलोकचारिणे नमः ।

ॐ मनोजवाय नमः ।

ॐ पारिजातद्रुमूलस्थाय नमः । २०

ॐ सर्वमंत्रस्वरूपवते नमः ।

ॐ सर्वतंत्रस्वरूपिणे नमः ।

ॐ सर्वयन्त्रात्मिकाय नमः ।

ॐ कपीश्वराय नमः ।

ॐ महाकायाय नमः ।

ॐ सर्वरोगहराय नमः ।

ॐ प्रभवे नमः ।

ॐ बलसिद्धिकराय नमः ।

ॐ सर्वविद्यासम्पत्प्रदायकाय नमः ।

ॐ कपिसेनानायकाय नमः । ३०

ॐ भविष्यच्चतुराननाय नमः ।

ॐ कुमारब्रह्मचारिणे नमः ।

ॐ रत्नकुण्डलदीप्तिमते नमः ।

ॐ चञ्चलद्वालसन्नद्धलंबमानशिखोज्ज्वलाय नमः ।

ॐ गन्धर्वविद्यातत्त्वज्ञाय नमः ।

ॐ महाबलपराक्रमाय नमः ।

ॐ कारागृहविमोक्त्रे नमः ।

ॐ शृंखलाबन्धमोचकाय नमः ।

ॐ सागरोत्तारकाय नमः ।

ॐ प्राज्ञाय नमः । ४०

ॐ रामदूताय नमः ।

ॐ प्रतापवते नमः ।

ॐ वानराय नमः ।

ॐ केसरीसूनवे नमः ।

ॐ सीताशोकनिवारणाय नमः ।

ॐ अञ्जनागर्भसंभूताय नमः ।

ॐ बालार्कसदृशाननाय नमः ।

ॐ विभीषणप्रियकराय नमः ।

ॐ दशग्रीवकुलांतकाय नमः ।

ॐ लक्ष्मणप्राणदात्रे नमः । ५०

ॐ वज्रकायाय नमः ।

ॐ महाद्युतये नमः ।

ॐ चिरञ्जीविने नमः ।

ॐ रामभक्ताय नमः ।

ॐ दैत्यकार्यविघातकाय नमः ।

ॐ अक्षहन्त्रे नमः ।

ॐ काञ्चनाभाय नमः ।

ॐ पञ्चवक्त्राय नमः ।

ॐ महातपसे नमः ।

ॐ लंकिणीभञ्जनाय नमः । ६०

ॐ श्रीमते नमः ।

ॐ सिंहिकाप्राणभञ्जनाय नमः ।

ॐ गन्धमादनशैलस्थाय नमः ।

ॐ लंकापुरविदाहकाय नमः ।

ॐ सुग्रीवसचिवाय नमः ।

ॐ धीराय नमः ।

ॐ शूराय नमः ।

ॐ दैत्यकुलान्तकाय नमः ।

ॐ सुरार्चिताय नमः ।

ॐ महातेजसे नमः । ७०

ॐ रामचूडामणिप्रदाय नमः ।

ॐ कामरूपिणे नमः ।

ॐ पिङ्गलाक्षाय नमः ।

ॐ वर्धिमैनाकपूजिताय नमः ।

ॐ कबलीकृतमार्ताण्डमण्डलाय नमः ।

ॐ विजितेन्द्रियाय नमः ।

ॐ रामसुग्रीवसंधात्रे नमः ।

ॐ महिरावणमर्दनाय नमः ।

ॐ स्फटिकाभाय नमः ।

ॐ वागधीशाय नमः । ८०

ॐ नवव्याकृतिपण्डिताय नमः ।

ॐ चतुर्बाहवे नमः ।

ॐ दीनबन्धवे नमः ।

ॐ महात्मने नमः ।

ॐ भक्तवत्सलाय नमः ।

ॐ संजीवननगाहर्त्रे नमः ।

ॐ शुचये नमः ।

ॐ वाग्मिने नमः ।

ॐ धृतव्रताय नमः ।

ॐ कालनेमिप्रमथनाय नमः । ९०

ॐ हरिर्मर्कट मर्कटाय नमः ।

ॐ दान्ताय नमः ।

ॐ शान्ताय नमः ।

ॐ प्रसन्नात्मने नमः ।

ॐ दशकण्ठमदापहाय नमः ।

ॐ योगिने नमः ।

ॐ रामकथालोलाय नमः ।

ॐ सीतान्वेषणपण्डिताय नमः ।

ॐ वज्रदंष्ट्राय नमः ।

ॐ वज्रनखाय नमः । १००

ॐ रुद्रवीर्यसमुद्भवाय नमः ।

ॐ इन्द्रजित्प्रहितामोघब्रह्मास्त्रविनिवर्तकाय नमः ।

ॐ पार्थध्वजाग्रसंवासाय नमः ।

ॐ शरपञ्जरहेलकाय नमः ।

ॐ दशबाहवे नमः ।

ॐ लोकपूज्याय नमः ।

ॐ जाम्बवत्प्रीतिवर्धनाय नमः ।

ॐ सीतासमेतश्रीरामपादसेवाधुरंधराय नमः । १०८

॥ इति श्रीमद् आञ्जनेयाष्टोत्तरशतनामावली सम्पूर्णा ॥

Encoded by Ravishankar Mayavaram.

Proofread by Ravishankar, Sowmya Ramkumar PR Ramamurthy

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Anjaneya Ashtottara Shatanamavali Lyrics in Devanagari PDF
% File name : hanuman108.itx
% Category : aShTottarashatanAmAvalI
% Location : doc_hanumaana
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravishankar Mayavaram
% Proofread by : Sowmya Ramkumar, PR Ramamurthy
% Description-comments : 108 names of Hanuman. From kAlikArahasya
% Latest update : December 28, 1997, September 14, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website